दशमः पाठः

# मन्दाकिनीवर्णनम्



( प्रस्तुतः पाठः वाल्मीकीयरामायणस्य अयोध्याकाण्डस्य पञ्चनवति ( 95 ) तमात् सर्गात् संकलितः। वनवासप्रसङ्गे रामः सीतया लक्ष्मणेन च सह चित्रकूटं प्राप्नोति। तत्रस्थितां मन्दाकिनीनदीं वर्णयन् सीतां सम्बोधयति। इयं नदी प्राकृतिकैरुपादानैः संवलिता चित्तं हरति। अस्याः वर्णनं कालिदासो रघुवंशकाव्येऽपि ( त्रयोदशसर्गे ) करोति। अनुष्टुप्छन्दसि महर्षिः वाल्मीकिः मन्दाकिनीवर्णने प्रकृतेः यथार्थं चित्रणं करोति। )

विचित्रपुलिनां रम्यां हंससारससेविताम् ।
कुसुमैरुपसंपन्नां पश्य मन्दाकिनीं नदीम् ॥1॥
नानाविधैस्तीररुहैर्वृतां पुष्पफलद्रुमैः ।
राजन्तीं राजराजस्य नलिनीमिव सर्वतः ॥2॥

मृगयूथनिपीतानि कलुषाम्भांसि साम्प्रतम् ।
तीर्थानि रमणीयानि रतिं संजनयन्ति मे ॥3॥
जटाजिनधराः काले वल्कलोत्तरवाससः ।
ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये ॥4॥
आदित्यमुपतिष्ठन्ते नियमादूर्ध्वबाहवः ।
एते परे विशालाक्षि मुनयः संशितव्रताः ॥5॥
मारुतोद्धूतशिखरैः प्रनृत्त इव पर्वतः ।
पादपैः पुष्पपत्राणि सृजद्भिरभितो नदीम् ॥6॥
क्वचिन्मणिनिकाशोदां क्वचित्पुलिनशालिनीम् ।
क्वचित्सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ॥7॥
निर्धूतान् वायुना पश्य विततान् पुष्पसञ्चयान् ।
पोप्लूयमानानपरान्पश्य त्वं जलमध्यगान् ॥8॥
तांश्चातिवल्गुवचसो रथाङ्गाह्वयना द्विजाः ।
अधिरोहन्ति कल्याणि निष्कूजन्तः शुभा गिरः ॥9॥
दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने ।
अधिकं पुरवासाच्च मन्ये तव च दर्शनात् ॥10॥

## अन्वयाः

(हे सीते !) कुसुमैः उपसम्पन्नां, विचित्रपुलिनां, हंससारससेवितां (च) रम्यां मन्दाकिनीं नदीं पश्य ॥ 1॥

(हे सीते !) नानाविधैः तीररुहैः पुष्पफलद्रुमैः सर्वतः वृतां राजन्तीं (च) (मन्दाकिनीम्) राजराजस्य नलिनीम् इव (पश्य) ॥ 2॥

(हे सीते !) साम्प्रतं मृगयूथनिपीतानि कलुषाम्भांसि रमणीयनि तीर्थानि मे रतिं संजनयन्ति ॥ 3॥

हे प्रिये ! काले जटाजिनधराः वल्कलोत्तरवाससः ऋषयः तु मन्दाकिनीं नदीम् अवगाहन्ते ॥ 4॥

हे विशालाक्षि ! एते परे संशितव्रता: मुनय: ऊर्ध्वबाहव: नियमात् आदित्यम् उपतिष्ठन्ते ॥ 5॥

(हे विशालाक्षि !) नदीम् अभितः पुष्पपत्राणि सृजद्भिः पादपैः मारुतोद्धूतशिखरैः पर्वतः प्रनृत्त इव ॥ 6॥

(हे विशालाक्षि !) क्वचित् मणिनिकाशोदां क्वचित् पुलिनशालिनीम् क्वचित् सिद्धजनाकीर्णां मन्दाकिनीं नदीं पश्य ॥ 7॥

हे तनुमध्यमे ! त्वं पश्य, वायुना निर्धूतान् विततान् पुष्पसंचयान् अपरान् (च) पोप्लूयमनान् जलमध्यगान् (पुष्पसंचयान् नदीम् अभितः) पश्य ॥ 8॥

हे कल्याणि ! पश्य ! (नदीम् अभितः) वल्गुवचसः रथाङ्गाह्वयना: द्विजा: च शुभा: गिर: निष्कूजन्तः तान् अधिरोहन्ति ॥9॥

हे शोभने ! (अत्र) चित्रकूटस्य मन्दाकिन्या: च (यत्) दर्शनं (भवति) (तत्) तव दर्शनात् च पुरवासात् च अधिकं मन्ये ॥10॥

## शब्दार्था:

| | | |
|---|---|---|
| विचित्रपुलिनाम् | - विविधवर्णतीराम् | - रंग-बिरंगे तटों वाली |
| रम्याम् | - रमणीयाम् | - सुन्दर को |
| कुसुमैः | - पुष्पैः | - फूलों से |
| द्रुमैः | - वृक्षैः | - वृक्षों से |
| राजन्तीम् | - शोभमानाम् | - सुशोभित होती हुई |
| नलिनीम् | - पुष्करिणीम् | - पोखर, तालाब को |
| मृगयूथनिपीतानि | - पशुसमूहनिपीतानि | - पशु समूह द्वारा पीये गये |
| कलुषाम्भांसि | - दूषितानि जलानि | - गन्दे जल |
| रमणीयानि | - मनोहराणि | - मन को मोहित करने वाले |
| जटाजिनधरा: | - जटाधारिणः मृगचर्मधारिणश्च | - जटा और मृगचर्मधारण करने वाले |
| वल्कलोत्तरवाससः | - वृक्षत्वगुरूपवस्त्रधारिणः | - वृक्ष की छाल को वस्त्र के रूप में धारण करनेवाले |

ABDIEL SOLUTIONS ABSOL PATNA

| | | | | |
|---|---|---|---|---|
| ऊर्ध्ववाहव: | - | कृतोपरिभुजा: | - | जिन्होंने अपनी भुजा को ऊपर किया है |
| विशालाक्षि | - | विशालनेत्रे | - | बड़ी-बड़ी आँखों वाली |
| संशितव्रता: | - | प्रशंसितव्रता: | - | प्रशंसनीय व्रत वाले |
| मारुतोद्धूतशिखरै: | - | पवनान्दोलितशृङ्गै: | - | हवा के द्वारा चोटियों को उड़ाते हुए |
| मणिनिकाशोदाम् | - | मणिसमानजलाम् | - | मणि जैसे जल बाली |
| निर्धूतान् | - | विकीर्णान् | - | उड़ाए गये |
| विततान् | - | विस्तृतान् | - | विस्तार किये गये |
| द्विजा: | - | खगा: | - | पक्षी |
| रथाङ्गाह्वयना: | - | चक्रवाका: | - | चकवे |
| वल्गुवचस: | - | मधुरवचना: | - | मीठी बोली वाले |
| पोप्लूयमानान् | - | उत्प्लवमानान् | - | तैरते हुए |
| राजराजस्य | - | कुबेरस्य | - | कुबेर का |
| नलिनीम् | - | पुष्करिणीम् | - | पोखर, तालाब को |

## व्याकरणम्

### सन्धि-विच्छेद:

| | | |
|---|---|---|
| कुसुमैरुपसम्पन्नाम् | - | कुसुमै: + उपसम्पन्नाम् |
| नानाविधैस्तीररुहैर्वृता | - | नानाविधै: + तीररुहै: + वृता |
| कलुषाम्भांसि | - | कलुष + अम्भांसि |
| ऋषयस्त्ववगाहन्ते | - | ऋषय: + तु + अवगाहन्ते |
| नियमादूर्ध्वबाहव: | - | नियमात् + ऊर्ध्वबाहव: |
| विशालाक्षि | - | विशाल + अक्षि |
| सृजद्भिरभित: | - | सृजद्भि: + अभित: |

| | | |
|---|---|---|
| क्वचिन्मणिनिकाशोदाम् | – | क्वचित् + मणिनिकाश + उदाम् |
| सिद्धजनाकीर्णाम् | – | सिद्धजन + आकीर्णाम् |
| तांश्चातिवल्गुवचसः | – | तान् + च + अतिवल्गुवचसः |
| मन्दाकिन्याश्च | – | मन्दाकिन्याः + च |
| पुरवासाच्च | – | पुरवासात् + च |

## अभ्यासः
### ( मौखिकः )

1. एकपदेन उत्तरं वदत -

(क) अस्मिन् पाठे का नदी वर्णिता अस्ति ?

(ख) मन्दाकिनी कस्य नलिनी इव सर्वतः राजते ?

(ग) मन्दाकिनीं नदीं के अवगाहन्ते ?

(घ) रामः मन्दाकिनीम् नदीं कां दर्शयति ?

(ङ) मन्दाकिनी-वर्णनं कुतः सङ्गृहीतम् अस्ति ?

(च) मुनयः कम् उपतिष्ठन्ते ?

(छ) कीदृशानि तीर्थानि रतिं सञ्जनयन्ति ?

2. श्लोकांशं योजयित्वा पूर्णं श्लोकं वदत –

(क) जटाजिनधरा काले ...................................।
ऋषयस्त्ववगाहन्ते ...................................।।

(ख) दर्शनं चित्रकूटस्य ...................................।
................................... मन्ये तव च दर्शनात्।।

## अभ्यासः

### ( लिखितः )

1. **एकपदेन उत्तरं लिखत -**

(क) मन्दाकिनी नदी कस्य पर्वतस्य निकटे प्रवहति ?

(ख) नृत्यति इव कः प्रतिभाति ?

(ग) साम्प्रतं कैः पीतानि जलानि कलुषितानि ?

(घ) ऊर्ध्वबाह्वः के सन्ति ?

(ङ) विशालाक्षि इति कस्याः कृते सम्बोधनम् ?

2. **पूर्णवाक्येन उत्तरं लिखत -**

(क) हंससारससेविता विचित्रपुलिना च का ?

(ख) संशितव्रताः मुनयः किं कुर्वन्ति ?

(ग) श्रीरामः मन्दाकिन्यां पोप्लूयमानान् कान् दर्शयति ?

(घ) सिद्धजनाकीर्णां मन्दाकिनीम् का पश्यति ?

(ङ) "मन्दाकिनी-वर्णनस्य" रचयिता कः ?

(च) "मन्दाकिनी-वर्णनम्" रामायणस्य कस्मिन् काण्डे अस्ति ?

(छ) शुभा गिरः के निष्कूजन्ति ?

3. **रिक्तस्थानानि पूरयत -**

(क) विचित्रपुलिनां रम्यां ..................................।

.......................... पश्य मन्दाकिनीं नदीम्॥

(ख) क्वचिन्मणिनिकाशोदां क्वचिद् ........................ ।

क्वचित् ........................ पश्य .................. ॥

4. **उदाहरणमनुसृत्य कोष्ठगतपदानां समुचितं प्रयोगं कृत्वा वाक्यानि योजयत -**

उदाहरणम् - मन्दाकिनीं नदी हंससारससेविता कुसुमैरुपसम्पन्ना .................. (नव्या, रम्या, भव्या)

उत्तरम् - मन्दाकिनीं नदीं हंससारससेविता कुसमैरुपसम्पन्ना रम्या अस्ति।

**प्रश्नाः**

(क) सीता रामचन्द्रस्य ......................। (माता, प्रिया, पुत्री)

(ख) जटाजिनधराः ऋषयः ...................... अवगाहन्ते।

(पद्माम्, मन्दाकिनीम्, यमुनाम्)

(ग) संशितव्रता मुनयः ...................... उत्तिष्ठन्ते। (रामं, आदित्यं, कृष्णं)

(घ) नदीम् अभितः ...................... प्रनृत्त इव। (धरा, वृक्षः, पर्वतः)

(ङ) पुरवासात् ...................... दर्शनम् अधिकं महत्त्वपूर्णम्।

(ग्रामस्य, वनस्य, चित्रकूटस्य)

(च) पक्षिणः पर्यायवाची ...................... अस्ति। (रवः, द्विजः, नगः)

(छ) अस्मिन् पाठे रथाङ्गाह्वयना ...................... खगस्य पर्यायवाची अस्ति।

(कपोतस्य, चक्रवाकस्य, काकस्य)

## योग्यताविस्तारः

अनेन पाठेन प्राकृतिकसौन्दर्यस्य वर्णनम् प्रस्तुतम् अस्ति। एतस्य पाठस्य सन्देशो वर्तते यत् सौन्दर्यबोधेन सह किशोराणां छात्राणां परिवेशबोधः पर्यावरणबोधो वा वर्धेत। अस्मिन् सन्दर्भे रामायणमहाभारतपुराणादिग्रन्थानाम् परिशीलनम् लाभप्रदम् अस्ति।

## क्रियानुशीलनम्

(क) रामायणस्य किष्किन्धाकाण्डे पम्पासरोवरस्य सौन्दर्यम् अवलोकनीयम्।

(ख) अभिज्ञानशाकुन्तले प्रकृतौ कृतं मानवीकरणं पर्यावरणबोधाय अनुकरणीयम्।

(ग) पुराणेषु लता-पादपानां महत्त्वाधायकानि पद्यानि सन्ति। तेषां सङ्कलनं कृत्वा प्रदर्शनी आयोजनीया।

□